Mahedhar Sharma

Ishwar parvāti sambade gurugitā Stotram

ईश्वर-पार्वती संवादे-गुरु गीता स्तोत्र

Sanskrit

Paper – Handwritten

N.A. (very old)

19 folio

8.3" × 4.3"

Complete

श्री गणेशाय नमः ॥ श्री गुरवे नमः ॥ अचिंत्याव्यक्तरूपाय निर्गुणाय
गुणात्मने ॥ समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥ १ ॥ ऋषय ऊचुः ।
गुह्याद्गुह्यतरं साक्षाद्गुरुगीता विशेषतः ॥ तव प्रसादाच्छ्रोतव्यं त
सर्वं ब्रूहि सुतं मे ॥ २ ॥ सूत उवाच कैलासशिखरे रम्ये भक्तिसाध
नं तवे ॥ प्रणम्य पार्वती भक्त्या शंकरं परिपृच्छति ॥ ३ ॥ पार्वत्युवा
च ॥ ॐ नमो देवदेवेश परात्पर जगद्गुरो ॥ सदाशिव महादेव गुरु

मुकुंद शर्मा वा...

दीक्षां प्रदेहि मे ॥४॥ केन मार्गेण भो स्वामिन् देही ब्रह्ममयो भवेत् ॥
त्वं कृपां कुरु मे स्वामिन् नमामि चरणौ तव ॥५॥ ईश्वर उवाच ॥ यस्य
देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रका
शंते महात्मनः ॥६॥ गुकारस्त्वंधकारस्याद्रुकारस्तद्विनाशकृत् ॥
अंधकारविनाशित्वाद्गुरुरित्यभिधीयते ॥७॥ यदंघ्रिकमलद्वंद्वं
द्वंद्वतापनिवारकं ॥ तारकं भवसिंधोश्च श्रीगुरुं प्रणमाम्यहं ॥८॥

ममरूपासिद्धिविधं च स्तोत्र यद्वदाम्यहं॥ लोकोपकारकं ग्रंथं केनापि न कृतं पुरा॥९॥ दुर्लभं त्रिषु लोकेषु श्रुत्वा त्वं व्यवदाम्यहं॥
किंचिद्गुरुं विना नान्ये तु संसारसंवरानने॥१०॥ वेदशास्त्र पुरा
णानि वृत्तिहासादिकानि च॥ मंत्र यंत्रादि विद्यानां स्मृतिरुच्चा
टनादिकं॥११॥ शैव शाक्ता गमाद्येनि नसे ति बहु शानि च॥ अप
भ्रंश समस्तानि जीवानां भ्रांत चेत सां॥१२॥ वेदशास्त्रा पुरा

यानिर्ईत्तिवैगुरुःकाम्यया॥स्वयंलोकगुरुःसाक्षाज्ञायतेवे
दतत्वंवितु॥१३॥यज्ञोदानंतपस्तीर्थंव्रतंधर्मस्तथैवच॥गुरुत
त्वमविज्ञायमूढास्तेन्यरताजनाः॥१४॥गुरुर्बुध्यात्मनोनान्यत्स
त्यंसत्यंवरानने॥तल्लाभार्थंप्रयत्नेनकर्तव्यंतुमनिषिभिः॥१५॥
गूढविद्याजगन्मायादेहमज्ञानसंभवं॥उदयंस्वप्रकाशेनगुरु
शब्देनकथ्यते॥१६॥देहीब्रह्मभवेयस्मात्त्वत्कृपार्थंवद

स्यहं॥सर्वपापविशुद्धात्मा श्रीगुरोःपादसेवनात्॥१७॥सर्वती
र्थावगाहस्यप्राप्नोतिसफलंनरः॥गुरोःपादोदकंपीत्वाजलं
शिरसिधारयेत्॥१८॥शोषणंपापपंकस्यदीपनंज्ञानतेजसां
॥गुरोःपादोदकंसम्यक्संसारार्णवतारकं॥१९॥अज्ञानमूलहर
णंजन्मकर्मनिवारणं॥ज्ञानवैराग्यसिध्यर्थंगुरोःपादोदकंपि
वेत्॥२०॥गुरोःपादोदकंपीत्वागुरोरुच्छिष्टभोजनं॥गुरुमूर्तेः

॥३॥

सदा ध्यानं गुरोः स्तोत्रं सदा जपेत् ॥२१॥ काशीक्षेत्रं निवासं च जा
न्हवी चरणोदकं ॥ गुरुर्विश्वेश्वरः साक्षात्तारकं ब्रह्म निश्चितं ॥
॥२२॥ शिरःपादांकितं कृत्वा गयावासोक्षयावटः ॥ तीर्थराजप्र
यागोसौ गुरुमुर्तेर्नमो नमः ॥२३॥ गुरोर्मुर्तिस्मरेन्नित्यं गुरोर्नाम
सदा जपेत् ॥ गुरोराज्ञां प्रकुर्वित गुरोरन्यं न भावयेत् ॥२४॥ गुरुव
क्रे स्थितं ब्रह्म प्राप्यते तत्प्रसादतः ॥ गुरुमूर्तेः सदा ध्यानं य

थास्वैरिणियो पिता ॥२५॥ निजाश्रमं स्वजातिं च स्वकीर्तिः पुष्टिव
र्द्धनं ॥ अन्यत्सर्वमपि त्याज्यं गुरोरन्यं न भावयेत् ॥२६॥ अनं
न्याश्चिंतयंतो मां सुलभं परमं पदं ॥ तस्मात्सर्वप्रयत्नेन गुरोराराध
धनं कुरु ॥२७॥ गुरुवक्त्रे स्थिता विद्या गुरुभक्त्या नु लभ्यते ॥ त्रैलो
क्यस्फुटवक्तारो देवाद्याः सुरपन्नगाः ॥२८॥ गुकारस्त्वंधकारः स्या
द्रुकारस्तेज उच्यते ॥ अज्ञानग्रासकं ब्रह्म गुरुरेव न संशय ॥

॥२९॥गुकारप्रथमोवर्णोयमादिगुणभासकः॥रुकारोद्वितीयंब्र
ह्ममायाभ्रांतिविमोचकं॥३०॥एवंगुरुपदंश्रेष्ठंदेवानामपिदु
ल्लभं॥हाहाहूहूगणैल्लोकिगंधर्वाद्यैश्चपूज्यते॥३१॥ध्रुवंतेषां
श्चसर्वेषांनास्तितत्वंगुरोःपरं॥आसनंशयनंवस्त्रंवाहनंभूषणा
दिकं॥३२॥साधकेनप्रदातव्यंगुरोःसंतोषकारकं॥गुरोराराधनं
कार्यंजीवितत्वंवैनिवेदयेत्॥३३॥कर्मणामनसावाचासद्विरारा

ध्येयं गुरुं ॥ दीर्घदंडं नमस्कृत्या निर्लज्जो गुरुसंन्निधौ ॥३४॥
शरीरमर्थंसंप्राप्तं गुरुर्वैवैनिवेदयेत् ॥ आत्मदारादिकं सर्वंस
द्गुरुभ्यो निवेदयेत् ॥३५॥ पूयकीटो भस्मविष्ठो दुर्गंधमलमूत्र
कं ॥ श्लेष्मरक्तत्वचोमांसं तनुरिष्यं वरानने ॥३६॥ संसारवृ
क्षमारूढाः पतंति नरकार्णवे ॥ येनोधृतमिदं विश्वं तस्मै श्री
गुरवे नमः ॥३७॥ गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ॥

॥५॥

गुरुरेव परंब्रह्म तस्मै श्री गुरवे नमः॥३८॥ अज्ञानतिमिरां
धस्य ज्ञानांजनशलाकया॥३९॥ चक्षुरुन्मीलितं येन तस्मै
श्री गुरवे नमः॥४०॥ अखंडमंडलाकारं व्याप्तं येन चराचरं॥
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः॥४१॥ सर्वश्रुतिशिरोरत्न
विराजितपदांकितं॥ वेदांतांबुजसूर्याय तस्मै श्री गुरवे नमः॥
॥४२॥ यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयं॥ स एव सर्वसंप

त्तिं तस्मै श्री गुरवे नमः ॥४३॥ चैतन्यं शाश्वतं शांतं व्योमातीतं निर
ञ्जनं ॥ नादबिंदुकलातीतं तस्मै श्री गुरवे नमः ॥४४॥ स्थावरं जं
वापि अत्र यं चरं येवन
गमं चैव सचराचरमेव च ॥ येन व्याप्तं जगत्सर्वं तस्मै श्री गुरवे न
मः ॥४५॥ ज्ञानशक्तिसमारूढं तत्त्वमालाविभूषितं ॥ भुक्तिमु
क्तिप्रदातारं तस्मै श्री गुरवे नमः ॥४६॥ अनेकजन्मसंप्राप्तक
र्मबंधविदाहकं ॥ स्वात्मज्ञानप्रभावेन तस्मै श्री गुरवे नमः ॥४७॥

शोषणं भवसिंधोश्च दीपनं ज्ञानसंपदां ॥ गुरोः पादोदकं सम्यक्
तस्मै श्री गुरवे नमः ॥४८॥ न गुरोरधिकं तत्वं न गुरोरधिकं तपः
॥ गुरुज्ञानात्परं नास्ति तस्मै श्री गुरवे नमः ॥४९॥ मन्नाथः श्रीज
गन्नाथो मद्गुरु श्री जगद्गुरुः ॥ ममात्मा सर्वभूतात्मा तस्मै श्री गुर
वे नमः ॥५०॥ ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदं ॥ मंत्रमू
लं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥५१॥ गुरुरादिरनादिश्च गु

स्वः परमदैवतं ॥ गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥ ५२ ॥
सप्तसागरपर्यंतं तीर्थस्नानादियफलं ॥ गुरोरंघ्रिजलं बिं
दुसहस्त्रांशेन दुर्लभं ॥ ५३ ॥ गुरुरेव जगत्सर्वं ब्रह्मविष्णु
शिवात्मकं ॥ गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥ ५४ ॥ ज्ञा
नं विज्ञानसहितं लभते गुरुभक्तितः ॥ गुरोः सामान्यतो ना
स्ति ध्येयो सो गुरुमार्गतः ॥ ५५ ॥ यस्मात्परतरं नान्यन्नेति

॥८॥

नेतीतिवै श्रुतिः॥ मनसा वचसा चैव सर्वदाराध्येद्गुरुं॥ ५६॥
गुरोः कृपाप्रसादेन ब्रह्म विष्णु सदाशिवाः॥ सामर्थ्यं तत्प्रसा
देन केवलं गुरुसेवया॥ ५७॥ देवकिन्नरगंधर्वाः पितरोयक्षचा
रणाः॥ मुनयोपिन जानंति गुरुशुश्रुषणाविधिं॥ ५८॥ महाहं
कारगर्वेण विद्यातपबलान्विताः॥ संसारकुहरावर्ते घटयंत्रे
घटोयथा॥ ५९॥ नमुक्तादेवगंधर्वाः पितरोयक्षकिन्नराः

॥ ऋषयः सर्वसिद्धाश्च गुरुसेवापराङ्मुखाः ॥ ८० ॥ ध्यानं शृ
णु महादेवि सर्वानंदप्रदायकं ॥ सर्वसौख्यप्रदं नित्यं भुक्तिमु
क्तिप्रदायकं ॥ ८१ ॥ श्रीमत्परंब्रह्मगुरुं वदामि श्रीमत्परंब्रह्म
गुरुं नमामि ॥ श्रीमत्परंब्रह्मगुरुं भजामि ॥ श्रीमत्परंब्रह्म
गुरुं स्मरामि ॥ ८२ ॥ ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्त्तिं ॥
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यं ॥ एकं नित्यं वि

मलमचलं सर्वधीसाक्षिभूतं॥ भावातितं त्रिगुणरहितं स
द्गुरुं तं नमामि॥६३॥ नित्यं शुद्धं निराभासं निराकारं निरंज
नं॥ नित्यबोधं चिदानंदं गुरुब्रह्म नमाम्यहं॥६४॥ हृदंबुजे
कर्णिकमध्यसंस्थ सिंहासने संस्थित दिव्यमूर्तिं॥ ध्यायेद्गु
रुं चंद्रकलाप्रकाशं सच्चित्सुखाभिष्टवरं दधानं॥६५॥
श्वेतांबरं श्वेतविकाशि पुष्पं मुक्ताफला भूषितदिव्यगा

त्रं॥ वामांकपीठस्थितदिव्यशक्तिं मंदस्मितं पूर्णकृपानिधा

नं॥ ६६॥ आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजबोध

युक्तं॥ योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि

॥ ६७॥ यस्मिन् सृष्टिस्थितिध्वंसविधानं निग्रहात्मकं॥ कृत्यं

पंचविधं शश्वद्भासते तं नमः शिवं॥ ६८॥ प्रातः शिरसि शु

क्लाब्जे द्विनेत्रं द्विभुजं गुरुं॥ वराभयप्रदं शांतं स्मरेत्तन्नामपू

॥१९॥

र्वकं॥६९॥ नगुरोरधिकं नगुरोरधिकं नगुरोरधिकं नगुरो
रधिकं॥ शिवशासनतः शिवशासनतः शिवशासनतः शि
वशासनतः॥७०॥ इदमेवशिवं इदमेवशिवं इदमेवशिवं इदमे
वशिवं॥ ममशासनतो ममशासनतो ममशासनतो ममशा
सनतः॥७१॥ एवं विधं गुरुं ध्यात्वा ज्ञानमुत्पद्यते स्वयं॥
तदा गुरूपदेशेन मुक्तोहमिति भावयेत्॥७२॥ गुरुणाद

र्शितमार्गमनः शुद्धिं चकारयेत्॥ अनित्यं खंडये सर्वंय
त्कंचैवात्सगोचरं॥ ७३॥ ज्ञेयं सर्वमनित्यं च ज्ञानं च मनउ
च्यते॥ ज्ञानं ज्ञेयं समं कुर्यान्नान्यः पंथाद्वितीयकः॥ ७४॥
एवं श्रुत्वा महादेवि गुरुनिंदां करोति यः॥ स याति नरकं घो
रं यावच्चंद्रदिवाकरौ॥ ७५॥ यावद्देहांतकल्पोस्ति ताव
देवि गुरुं स्मरेत्॥ गुरुलोपो न कर्तव्यः स्वच्छंदो यदि भाव

॥१०॥

पेतं ॥ ७६ ॥ हुंकारेण न वक्तव्यं प्राज्ञाशिष्यैः कदाचन ॥ गु
रोरग्रे न वक्तव्यमसत्यं च कदाचन ॥ ७७ ॥ यो वै हुं कृत्य हुं कृत्सा
गुरुं निर्जित्य वादतः ॥ अरण्ये निर्जले स्थाने संभवेद्ब्रह्मराक्ष
सः ॥ ७८ ॥ मुनिभिः पन्नगैर्वापि सुरैर्वा शापितो यदि ॥ काल
मृत्युभयाद्वापि गुरू रक्षति पार्वति ॥ ७९ ॥ अशक्ता हि सु
राः सर्वे ह्यशक्ता मुनयस्तथा ॥ गुरुशापहताः क्षीणाः

क्षयंयांतिनसंशयः॥ ८०॥ मंत्रराजमिदंदेविगुरूरित्यक्षर
द्वयं॥ श्रुतिवेदांतवाक्येचनगुरूःसाक्षात्परंपदं॥ ८१॥ श्रुति
स्मृतिमविज्ञायकेवलंगुरूसेवया॥ तेवैसंन्यासिनःप्रोक्ता
इतरेवेषधारिणः॥ ८२॥ नित्यंब्रह्मनिराकारंनिर्गुणंबोध
येत्परं॥ पूर्णब्रह्मनिराकारंदीपादीपांतरंयथा॥ ८३॥ गुरोः
कृपाप्रसादेनआत्मारामोहिलभ्यते॥ अनेनगुरूमार्गे

॥२२॥

णस्वयमज्ञानं प्रवर्त्तते ॥ आब्रह्मस्तंबपर्यंतं परमात्मास्वरूप
कं ॥ स्थावरं जंगमं चैव प्रणमामि जगन्मयं ॥ ९४ ॥ वंदेहं सच्चि
दानंदं भेदातीतं सदा गुरुं ॥ नित्यपूर्णं निराकारं निर्गुणं स्वात्म
संस्थितं ॥ ९५ ॥ परात्परतरं ध्येयं नित्यमानंदकारकं ॥ हृदया
काशमध्यस्थं शुद्धस्फटिकसंनिभं ॥ ९६ ॥ स्फटिकप्रतिमारू
पं दृश्यते दर्पणे यथा ॥ तथात्मानं चिदाकारमानंदं सोहमुच्य

ते ॥८७॥ अंगुष्ठमात्रं पुरुषं ध्यायते चिन्मयं हृदि ॥ तत्र स्फुरति
भावो यः शृणु तत्कथयाम्यहं ॥८८॥ अगोचरं तथागम्यं रूप
नामादिवर्जितं ॥ निःशब्दं तु विजानीयात्तस्य भावो ब्रह्म पार्वति
॥८९॥ यथा निजस्य भावेन कर्पूरं कुसुमादिकं ॥ शीतोष्णादि
स्वभावेन तथा ब्रह्म च शाश्वतं ॥९०॥ स्वयं सर्वमयो भूत्वा स्यात
त्वं यत्र कुत्रचित् ॥ कीटभृंगमिव ध्यानं यथा भवति तादृशं ॥

।१२॥

॥ ११ ॥ गुरुध्यानं तथा नित्यं देही ब्रह्मस्वयं भवेत् ॥ पिंडे पदे

तथा रूपे मुक्तासि नात्र संशयः ॥ १२ ॥ पार्वत्युवाच ॥ पिंडं तु किं

महादेव पदं तु किमुदाहृतं ॥ रूपं रूपातीतमेवसत्तदाख्याहि

शंकर ॥ १३ ॥ सदाशिवो ॥ पिंडं कुंडलिनी शक्तिः पदं हंसमुदाहृ

तं ॥ रूपं बिंदुरितिज्ञेयं रूपातीतं निरंजनं ॥ १४ ॥ स्वयं सर्वमयो

भूत्वा परं तत्त्वं विचिंतयेत् ॥ परात्परतरं नान्यत् सर्वमेवं निराल

यं॥१५॥ यस्यावलोकनादेवसर्वसंगविवर्जितः॥ एकाकीनिस्पृ
हः शांतः स्थातव्यंतसंदेवहि॥१६॥ अलब्धंवातथालब्धंसल्पं
नाबहुलंतथा॥ निष्कामेनतुभोक्तव्यंसदासंतुष्टमानसः॥१७॥
सर्वज्ञपदमित्याहुर्देहीसर्वमायोविदुः॥ सदानंदःसदाशांतोरम
तेयत्रकुत्रचित्॥१८॥ यत्रैवतिष्ठतेचायंसदेशःपुंण्यभाजनः॥
मुक्तस्यलक्षणंदेवीतवाग्रेकथितंमया॥१९॥ उपदेशात्मयादे

वीगुरुमार्गेणदर्शितः॥गुरुभक्तिस्तथाध्यानंसकलंतवकी
र्तितं॥१००॥अनेनयद्भवेत्कार्यंतद्वदामिमहातपे॥लोकोपका
रकंदेविलौकिकंतुनभावयेत्॥१॥लौकिकंकर्मतोयांतिज्ञा
नहीनाभवार्णवं॥ज्ञानिनाभावयेसर्वंसर्व[कर्म]निष्कर्मशाम्यति॥
॥२॥इदंतुभक्तिभावेनपठंतेश्रुयतेयदि॥लिखित्वाचप्रदात
व्यंतत्सर्वंसफलंभवेत्॥३॥गुरुगीतामिमांदेवीशुद्धंतत्वंम

यो दितं ॥ भवव्याधिविनाशार्थं स्वयमेव सदा जपेत् ॥ ४ ॥ गुरुगीता
क्षरं चैकं मंत्रराजमिमं प्रिये ॥ अन्ये च विविधा मंत्राः कलां नार्हंति षो
डशीं ॥ ५ ॥ अनंतफलमाप्नोति गुरुगीतां जपेन तु ॥ सर्वपापसमू
लघ्नं सर्वदारिद्र्यनाशनं ॥ ६ ॥ अकालमृत्युहरणं सर्वसंकटनाश
नं ॥ यक्षराक्षसभूतघ्नं चोरव्याघ्रभयापहं ॥ ७ ॥ महाव्याधिग
तेजंतौ विभूतिः सिद्धिदा भवेत् ॥ अथवा मोहने वश्ये स्वयमेव तु

मानवः॥८॥ कुंभे वा दूर्वया देवि आसने शुभ्रकंबले॥ उपविश्य
ततो देवि जपेदेकाग्रमानसः॥९॥ शुक्लासनं वैश्यां स्यर्थे वश्ये
रक्तासनं प्रिये॥ अभिचारे कृष्णवर्णं पीतवर्णं धनागमे॥१०॥
उत्तरे शांतिजाप्यं स्याद्वश्ये पूर्वमुखोदितं॥ दक्षिणे मारणे प्रो
क्तं स्तंभनं पश्चिमे मुखे॥११॥ मोहनं सर्वभूतानां बंधमोक्षकरं
परं॥ देवभूतप्रियकरं राज्ञानं वशमानयेत्॥१२॥ मुखस्तंभ

करंनृणांसद्गुणानांविवर्द्धनं॥दुष्कर्मनाशनंचैवसत्कर्मसिद्धि
दंभवेत्॥१३॥ असिद्धंसिद्धयेत्कार्यंनवग्रहभयापहं॥दुःस्वप्न
नाशनंचैवसुस्वप्नफलदायकं॥१४॥सर्वशांतिकरंनित्यंवंध्या
पुत्रफलप्रदं॥अवैधव्यंकरंस्त्रीणांपरंसौभाग्यदायकं॥१५॥
आयुरारोग्यमैश्वर्यंपुत्रपौत्रविवर्द्धनं॥अकामस्तुत्रिवारं
हिजपेन्मोक्षमवाप्नुयात्॥१६॥अवैधव्यंसकामेनलभ

॥१५॥

ते चांन्यजन्मनि॥सर्वदुःखभयंविघ्नंनाशंयेत्तापहारकं॥
॥१७॥सर्वबाधाप्रशमनंधर्मकामार्थमोक्षदं॥यंयंचिंतयं
ते कामंतंतंप्राप्नोतिनिश्चितं॥१८॥कामितस्यकामधेनुः
कल्पितःकल्पपादपः॥चिंतामणिश्चिंतितस्यसर्वमंगलका
रकं॥१९॥लिखित्वादापयेद्योवैमोक्षश्रियमवाप्नुयात्॥जंप
त्सहस्रसोरस्य गणपत्य श्चवैष्णवी॥प्रौवस्यसिद्धिंददे

न संशयः

विसत्यं सत्यं वरानने ॥२०॥ अथ काम्य जपस्थानं कथयामि
वरानने ॥ सागरे वा सरित्तीरे तीर्थे हरिहरालये ॥२१॥ शक्तिदेवा
लये गोष्ठे सर्वदेवालये शुभे ॥ वटे वा धात्रिमूले वा मठे वृंदावने त
था ॥२२॥ पवित्रे निर्मले स्थाने नित्यानुष्ठानतोपि वा ॥ निर्धने
न त्वमेनैव जपमात्त्समारभेत् ॥२३॥ स्मशाने भयभूमौ च वट
मूलांतिके तथा ॥ सिध्यंति धात्रिमूले च चूतवृक्षस्य स

॥१६॥

न्निधौ ॥२४॥ गुरुपूञ्च वेरोमूर्खःस्तस्य सिध्यतिनान्यथा ॥ शुभ
कर्माणि सर्वाणि दीक्षादानादि सिद्धिदा ॥२५॥ संसारभयनाशा
र्थं भवपाशनिवृत्तये (७२) ॥ गुरुगीताभसि स्नानं तत्त्वज्ञः कुरुते सदा ॥
॥२६॥ सएव सद्गुरुः साक्षात्सदासद्ब्रह्मवित्तमः ॥ तस्य स्थानानि
वर्णानि पवित्राणि न संशयः ॥२७॥ सर्वदेश एव (यत्रा) शुद्धो सौ स्व
भावाद्यत्र तिष्ठति ॥ तत्र देवगणाः सर्वे क्षेत्रपीठे वसंति हि ॥

॥२९॥ आसनस्थः शैनो वा गछंस्तिष्ठंन्नेयाथापिवा॥ अथ्वा
रूढो गजारूढो सुप्तो वा जाग्रन्नथाप्यसौ॥२९॥ शुचिर्भा
नूसर्वदाज्ञानी गुरुगीताजपेनतु॥ तस्यदर्शनमात्रेणपुन
र्जन्मनविद्यते॥३०॥ सागरेतुयथातोयंक्षीरेक्षीरंजलेजलं 21
॥भिन्नकुंभेयथाकाशंतथात्मापरमात्मनि॥३१॥ तथैवज्ञा
निजीवात्मापरब्रह्मणिलीयते॥ ऐक्येनरमंतेज्ञानीयत्रत

त्र दिवा निशि ॥३२॥ एवंविधो महामुक्तः सर्वदा वर्त्तते स्वयं ॥
तस्मात्सर्वप्रयत्नेन भक्तिभावं करोति यः ॥३३॥ गुरोः संतोषि
तः सर्वे मुक्तास्तेनात्र संशयः ॥ भुक्तिमुक्तिर्दयांते यां जिव्हाग्रे
च सरस्वती ॥३४॥ अनेन प्राणिनः सर्वे गुरुगीताजपान्वि
१२५॥
ताः सर्वसिद्धिमवाप्नोति भुक्तिं मुक्तिं न संशयः ॥३५॥ सत्यं
सत्यं पुनः सत्यं निजधर्मो मयोदितः ॥ गुरुगीतासमं नास्ति

सत्यंसत्यंवरानने॥३६॥गुरुर्देवोगुरुर्धर्मोगुरुर्निष्ठापरंतप।
गुरोःपरतरंनास्तिनास्तितत्वंगुरोःपरं॥३७॥धंन्यामातापिता
धंन्योधंन्योवंशःकुलंतथा॥धंन्याचवसुधादेवीगुरुभक्ति
स्तुदुर्लभा॥३८॥शरीरमिंद्रियाप्राणाअर्थास्वजनबांध
वाः॥पितामाताकुलंदेवीगुरुरेवनसंशयः॥३९॥आकल्प
जन्मनांकोट्याजपव्रततपक्रियां॥तत्सर्वंसफलंदेवी

गुरुसंतोषमात्रतः ॥४०॥ विद्याधनमंदेनैव मंदभाग्याश्चये
जनाः ॥ गुरुसेवां न कुर्वंति सत्यंसत्यं वरानंने ॥४१॥ ब्रह्मवि
ष्णुमहेशाश्च देवर्षिपितृकिंन्नराः ॥ सिद्धचारणयक्षाश्च
मुनयो ऋषयो जनाः ॥४२॥ गुरुसेवापरं तीर्थमन्यतीर्थनि
रर्थकं ॥ सर्वतीर्थमयं देवि सद्गुरोश्चरणांबुजं ॥४३॥ इदंरह
स्यं नो वाच्यं तवाग्रे कथितं मया ॥ सुगोप्यं च मयस्नेनंयेना

त्मा त्वं प्रयस्यसि ॥४४॥ स्वामि मुख्य गणेशादि वैष्णवादि
षु पार्वति ॥ मनसापि न वक्तव्यं मम सान्निध्य कारकं ॥४५॥
अतीव चित्त पक्कस्य श्रद्धा भावं विलोक्यवै ॥ प्रवक्तव्यमि
दं देवि मम आत्मासि सदा प्रिये ॥४६॥ अभक्ते वंचके धूर्ते पाखं
डे नास्तिके नरे ॥ मनसापि न वक्तव्यं गुरु गीतामिदं प्रिये ॥४७॥
गुरवो बहवः संती शिष्य वित्तापहारकाः ॥ दुर्लभोयं गुरु

॥१९॥ देवि शिष्यसंतापहारकः ॥४८॥ क्लं ॥ संसारसागरस
मुद्धरणैकमंत्रं ब्रह्मादिदेवमुनिपुजितसिद्धमंत्रं ॥४९॥
दारिद्र्यदुःखभयशोकविनाशमंत्रं वंदे महाभयहरं गुरुराज
मंत्रं ॥५०॥ इति श्रीस्कंदपुराणे उत्तरखंडे ईश्वरपार्वतीसं
वादे गुरुगीतास्तोत्रं ॥ ॥ समाप्तं ॥ ॥ छ्री
॥ श्रीरस्तु ॥ ॥ हास्त आक्षर लिख्यते ॥